नं ~~३५८~~

१९८

नं: ९३७४ क
महोग्रतारास्तवनः
२ पत्रे

तन्नाम

ॐ· ॐनमस्त्वरितायैनमः ॐअस्यश्रीमत्त्वरितास्तो
१ त्रमंत्रस्य अक्षोभ्यऋषिः अनुष्टुप्छंदः श्रीमत्त्वरिता
रादेवता ह्रींबीजं ह्रूंशक्तिः फट्कीलकम् इ
ष्टार्थेपाठेविनियोगः अक्षोभ्यऋषयेनमः शिर
सि अनुष्टुप्छंदसेनमोमुखे श्रीमत्त्वरितादेवता
यैनमोहृदि ह्रींबीजायनमोगुह्ये ह्रूंशक्तयेन
मः पादयोः फट्कीलकायनमोनाभौ इष्टार्थेपा
ठेविनियोगःनमः सर्वांगेषु अथकरन्यासः ॐ
अंगुष्ठाभ्यांनमः ह्रींतर्जनीभ्यांनमः ह्रूंमध्यमा
भ्यांनमः हूं अनामिकाभ्यांनमः फट् कनिष्ठिका
भ्यांनमः नमः करतलकरपृष्ठाभ्यांनमः इति
करन्यासः अथषडंगन्यासः ॐहृदयायनमः
ह्रींशिरसेस्वाहा ह्रूंशिखायैवौषट् हूंकवचायहुं
फट् नेत्रत्रयायै वौषट् नमःअस्त्रायफट् इतिषडंग
न्यासः अथध्यानं ॐव्यालीढपदार्पि...
तयोगाट्टहासापरा खड्गेन्दीवरकर्तृखपरभु...

कारवीजोद्भवा खर्वीनीलविशालपिंगलजटा
जूटोग्रनागैर्युताजाड्यंन्यस्यकपालके त्रिजगतां
हंत्र्युग्रतारास्वयम् इति ध्यानं अथ स्तुतिः घोर
रूपेमहारावे सर्वशत्रुभयंकरि भक्तेभ्योवरदेदे
वित्राहिमांशरणागतं १ सुरासुरार्चितेदेविसिद्ध
गंधर्वसेविते जाड्यपापहरेदेवित्राहिमांशरणाग
तं २ जटाजूटसमायुक्तेलोलजिह्वानुकारिणि
द्रुतबुद्धिकरेदेवित्राहिमांशरणागतं ३ सौम्यरूपेक्रूर
रूपेचंडरूपेनमोस्तुते सृष्टिरूपेनमस्तुभ्यंत्राहिमां
शरणागतं ४ जडतांभजतांहंसिभक्तानांभक्तवत्स
ले मूढतांहरदेवेशित्राहिमांशरणागतं ५ हूंहूंका
रमयेदेविबलिहोमप्रियेनमः उग्रतारेनमोनित्यं
त्राहिमांशरणागतं ६ बुद्धिंदेहियशोदेहिकवित्व
देविदेहिमे मूढत्वंहरदेवेशित्राहिमांशरणागतं
[illegible]दि विघ्नहन्त्वंदितेकरुणामये तारेता
रायिनाथास्येत्राहिमांशरणागतं ७ अष्टम्यांचच

ॐ त्रर्दश्यां नवम्यां च पठेन्नरः षण्मासैः सिद्धिमाप्नो
२ ति नात्र कार्या विचारणा ९ मोक्षार्थी लभते मोक्षं
धनार्थी लभते धनं विद्यार्थी लभते विद्यां तर्कव्या
करणादिकां इदं स्तोत्रं पठेद्यस्तु सततं लभते नरः
तस्य शत्रुः क्षयं याति महाप्रज्ञा च जायते पीडायां
वापि संग्रामे महोत्पाते तथा भये य इदं पठते स्तो
त्रं स्तवं तस्य न संशयः इति नामकल्पे महोग्रता
रास्तवराजः समाप्तम्